# संस्कृतवार्ता:

**दिनाङ्क :- 09.04.2025** **प्रात: - 06:55**

**प्रधानमन्त्री-सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी न्यगादयत् यत् संसदि पारितम् पञ्चविंशत्यधिकद्विसहस्रतमवर्षीयम् वक्फसंशोधन विधेयकम् सामाजिकन्यायदिशि महत्वपूर्णं सोपानमस्तीति। श्रीमोदिना संसदे एकस्मै उल्लेखनीयाय विधये वर्धापनानि प्रदत्तानि यद्धि मुस्लिमसमुदायं समेत्य समेषां समुदायानां हितानां सेवां विदधाति। सर्वकारीयेतर-सञ्चार-माध्यमद्वारा आयोजितं कार्यक्रमम् सम्बोधयन् प्रधानमन्त्री प्रोक्तवान् यत् साम्प्रतं वक्फइत्येतस्य पवित्रता संरक्षिता भविष्यति अपि च मुस्लिमजनानां महिलानां बालानाम् अधिकाराणां संरक्षणं भविष्यति। स्वसम्बोधने असौ अग्रे अवोचत् यत् केषुचिदेव वर्षेषु भारतं एकादशत: पञ्चमी बृहत्तमा अर्थव्यवस्था जाता। मुद्रायोजनायां प्रधानमन्त्री अवदत् यत् एषा योजना प्रत्याभूते: अभ्यर्थनं नैव कृतवती अपि तु जनेषु विश्वासं प्रकटितवती। कार्यक्रमावधौ प्रधानमन्त्री समाधान इत्यभिनामधेयकस्य अनावरणं कृतवान्।

**राष्ट्रपति: - पुर्तगालदेश:**

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: पोर्तगालदेशस्य सफलयात्रानन्तरम् अद्य प्रात: काले स्लोवाकियादेशस्य राजधानीं ब्रातिस्लावां सम्प्राप्तवती। राष्ट्रपते: पोर्तगालयात्रा इयम् सप्तविंशतिवर्षेषु प्रथमा राजकीययात्रासीत्। वार्ताहरान् संसूचयन् विदेशमन्त्रालयस्य सचिव: तन्मयलाल: प्रोक्तवान् यत् राष्ट्रपते: पोर्तगाल-देशस्य प्रधानमन्त्रिणा लुइस-मोंटेनेग्रो इत्येतेन साकं सार्थकी चर्चा सम्पादिता। उभौ नेतारौ द्विपक्षीयविषयाणाम् अन्ताराष्ट्रिय प्रसङ्गानां च एकस्यां विस्तृतशृङ्खलायां व्यापकीं चर्चां प्रतिपादितवन्तौ। उभाभ्यां विभिन्नेषु क्षेत्रेषु पारस्परिक-सहयोगस्य संवर्धनस्य महत्त्वं प्रतिपादितम्।

**प्रधानमन्त्री-नवकार-महामन्त्र:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् आयोक्ष्यमाणे नवकार-महामन्त्र-दिवससमारोहे सहभागं करिष्यति। अत्रावसरे उपस्थितान् जनान् अपि असौ सम्बोधयिष्यति। अवधेयं वर्तते यत् नवकार-महामन्त्र-दिवस: आध्यात्मिक-सद्भावस्य जातीय-चेतनाया: च महत्त्वपूर्ण: दिवसो विद्यते। यो हि सामूहिकजपस्य माध्यमेन जनान् पारस्परिकरूपेण संयोजयति। नवकारमहामन्त्र: जैनधर्मे सर्वाधिक: पूजनीय: सार्वभौमिक: च मन्त्रो निगद्यते। अयं दिवस: सर्वान् जनान् आत्मशुद्धे: सहिष्णुताया: सामूहिकहितानां च मूल्येषु चिन्तनाय प्रोत्साहयति। अष्टाधिकैकशत-देशानां जना: शान्तये संयोजनाय च एतस्मिन् वैश्विकमन्त्रे सम्मिलिता: भविष्यन्ति।

**भारतीयरिज़र्वबैंक:**

भारतीयरिज़र्वबैंकस्य मौद्रिक-नीति-समिति-सम्मेलनमद्य प्रमुखेण सञ्जयमल्होत्राइत्येतेन उद्घोषिताया: प्रमुखाया: निर्धारितमानकगत-निकषाया: घोषणाया: अनन्तरम् अवसीयते। रेपोरेटइत्येतस्य मानं समेत्य आर्.बी.आई. इत्येतस्य प्रमुख: भारतीयार्थव्यवस्थायै विकासानुमाने मुद्रास्फीतिस्थित्यां सकलगृहोत्पादवृद्धौ वार्तां करिष्यति। अस्या: समिते: उपवेशनम् अप्रैलमासस्य नवमे दिनाङ्के समारब्धम्। प्रमुखाया: घोषणाया: अनन्तरम् आर्.बी.आई. इत्येतस्य प्रमुख: वार्ताहरसम्मेलनं सम्बोधयिष्यति।

**लक्ष्यवेधस्पर्धा**

लक्ष्यवेधस्पर्धायां विजयवीरसिद्धू: अर्जेंटीनाया: ब्यूनस-आयर्स इत्यत्र आई.एस्.एस्.एफ. विश्वचषकप्रतियोगितायां पुरुषाणां पञ्चविंशतिमीटर-रैपिडफायर-पिस्टलप्रतिस्पर्धायां स्वर्णपदकं सम्प्राप्य प्रथम: भारतीयक्रीडालु: जात:।

**आई.पी.एल्. क्रिकेट्**

आई.पी.एल्. इत्येतस्यां क्रिकेट्-मालिकायां पञ्जाबकिंग्सदलं चेन्नै-सुपर-किंग्स-दलम् अष्टादश-धावनाङ्कै: पराजितवत्। अद्य गुजरात-टाइटन्स-राजस्थान-रॉयल्स-दलयोर्मध्ये स्पर्धा निर्धारितास्ति।

**म्यांमारदेश:**

म्यांमारदेशे आगते विनाशकारिणि भूकम्पे मृतकानां संख्या संवर्ध्य पञ्चचत्वारिंशदधिक-षड्शतोत्तर-त्रिसहस्रं यावत् जाता तत्रैव सप्तदशाधिक पञ्चसहस्रं यावत् जना: व्रणिता: अथ च अष्टचत्वारिंशदधिकैकशत-सङ्ख्यका: जना: विलुप्ता: सन्तीति सूच्यते।

**कृषि-बिम्स्टेक:**

केन्द्रीयकृषि-कृषक-कल्याण-ग्रामीणविकास-मंत्री शिवराजसिंह-चौहानः अद्य नेपालदेशे तृतीयायां बिम्स्टेक-कृषि-मन्त्रिस्तरीय-सभायां भागं ग्रहीष्यति। एकस्मिन् वक्तव्ये, कृषि-मन्त्रालयेन सूचितं यत् श्री चौहानः नेपालस्य प्रधानमन्त्रिणा के. पी. शर्मा ओली-इत्यमुना, कृषि-पशुधन-विकास-मन्त्रिणा रामनाथ-अधिकारिणा च सह मेलनं करिष्यति। कृषिक्षेत्रे सहकारविषये द्वयोः राष्ट्रयोः मध्ये सहमति-पत्रस्य हस्ताक्षरं भविष्यति।